# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**B.A./B.SC. FIFTH SEMESTER EXAMINATION, DECEMBER 2013**

**THIRD YEAR**

**SANSKRIT (Honours)**

Date : 19/12/2013

Time : 11 am – 3 pm

Paper : VI

Full Marks : 100

1. a) अधोदत्तयोः कस्यचन **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [10]

   क) पाठ्यांशानुसारं रुद्रदेवताचारित्रिकवैशिष्ट्यं प्रतिपादनीयम्।

   ख) भूमिसूक्तस्य कस्मिन् वेदे अन्तर्भावः ? अस्मिन् सूक्ते प्रतिपादितं भूमेर्माहात्म्यं समुपवर्ण्यताम्।

**Or,**

   b) निम्नोद्धृतानां ययोः कयोश्चिद् **द्वयोः** मन्त्रयोः अनुवादः करणीय आङ्गलभाषया वङ्गभाषया वा। [2×5]

   क) नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
   अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।।

   ख) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
   सा नो भूतस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।

   ग) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
   सा तो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।।

2. a) अधोदत्तयोः **एकस्य** प्रश्नस्योत्तरं देयम्। [10]

   क) ''...किंस्वित् पुत्रेण विन्दते तन्म आचक्ष्व...'' – कं जनं प्रति कस्य जनस्यायमनुरोधः ? अनुरुद्धजनेन किमुत्तरं दत्तम् ? [2+8]

   ख) भवत्पाठ्यमनुमत्स्यकथानुसारं प्लावनवृत्तान्त उपन्यसनीयः। देशान्तरे एतादृशवृत्तमुपलभ्यते किम् ? [8+2]

**Or,**

   b) अधोदत्तानाम् यस्य कस्यचिद् अनुच्छेद**द्वयस्य** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। [2×5]

   क) तं होवाचाजनि वै ते पुत्रो यजस्व माऽनेनेति, स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति।

   ख) यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि। स यदा तामतिव्वर्धाऽ अथ कर्षूं खात्वा तस्यां मां बिभरासि।

   ग) शश्वद्ध ऋषऽ आस। स हि ज्येष्ठं व्वर्धतेऽथेतिथीं समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति।

3. अधोदत्तयोः यथेच्छम् **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [10]

   क) पाठ्यांशानुसारं जीवात्मन उत्क्रान्तिप्रक्रिया वर्णनीया।

   ख) ...आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्। – कथमस्मिन् सिद्धान्ते उपनयनम् ?

4. अधोलिखितानां यथेच्छं **द्वयोः** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। [2×6]

   क) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
   ततो भूय इव ते तमो य उ विद्यायां रताः।।

   ख) सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा।

   ग) ... स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारम् अरे केन विजानीयाद् इत्युक्तानुशासनाऽसि मैत्रेयि...।

घ) तस्मिञ्छुक्लमुत नीलमाहुः
पिङ्गलं हरितं लोहितञ्च।
एष पन्था ब्रह्मणा हानुवित्त–
स्तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च।।

5. अधोलिखितयोर्यस्य कस्यचि**<u>देकस्य</u>** प्रसङ्गोल्लेखपूर्वकं व्याख्या लेख्या **<u>संस्कृतेन</u>**। [8]

क) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।।

ख) मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

6. अधोदत्तयोः **<u>एकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [12]

क) याज्ञवल्क्यमनुसृत्य स्त्रीधनविषये कश्चिन् निबन्धो विरचनीयः।

ख) व्यवहारस्य कति पादाः ? विषयेऽस्मिन् विस्तरेणालोचनं कार्यम्।

7. अधोदत्तयोः **<u>एकस्य</u>** पद्यस्य **<u>संस्कृतेन</u>** व्याख्या लेख्या प्रसङ्गोल्लेखपुरःसरम्। [7]

क) साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः।।

ख) न योषित् पतिपुत्राभ्यां न पुत्रेण कृतं पिता।
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा।।

8. अधोलिखितेषु विषय**<u>द्वय</u>**माश्रित्य टीका रचनीया। [2×3]

क) प्राड्विवाकः। ख) वृद्धिः। ग) साक्षी। घ) व्यवहारः।

9. अधोदत्तयोः कस्यचन **<u>एकस्य</u>** प्रश्नस्योत्तरं प्रदेयम्। [10]

क) स्मृतिशास्त्रेतिहासे मनुसंहितायाः स्थानमवलम्ब्य प्रबन्धो विरचनीयः।

ख) स्मृतिशास्त्रेतिहासे रघुनन्दनस्यावदानमवलम्ब्य निबन्धो विरचनीयः।

10. अधोदत्तेषु यत्किमपि विषय**<u>त्रय</u>**मवलम्ब्य टीका विरचनीयाः। [3×5]

क) कुल्लूकभट्टः। ख) मिताक्षरा। ग) बृहस्पतिसंहिता घ) हलायुधः। ङ) जीमूतवाहनः च) चतुर्वर्गचिन्तामणिः।